१०१५- पत्र-२-

Shri Rag... Temp... MSS. Library,
JAMMU

No. १०१५-घ

Title १- प्रणवोपनिषत् २- आरुणेयोपनिषत्
३- कालाग्निरुद्रोपनिषत्

Author

Extent २ Age

Subject उपनिषद: (त्रिस्त्र:)

© Dharmartha Trust. Digitized by eGangotri

क प्रणवोपनिषत्

ख आरुणेयोपनिषत्

ग कालाग्निरुद्रोपनिषत्

१०२५

2

© Dharmartha Trust. Digitized by eGangotri

श्रीगणेशाय नमः॥ हरिः ॐ॥ सह नाववतु॥ सह नौ भुनक्तु॥ सह वीर्यं करवावहै॥ तेजस्विनाव
धीतमस्तु मा विद्विषावहै॥ ॐ शांतिः शांतिः शांतिः॥ पुरस्ताद्ब्रह्मणस्तस्य विष्णोरद्भुतकर्मणः॥
रहस्यं ब्रह्मविद्याया धृताग्निं संप्रवक्ष्यते॥ ओमित्येकाक्षरं ब्रह्म यदुक्तं ब्रह्मवादिभिः॥ शरीरं तस्य व
क्ष्यामि स्थानकालत्रयं तथा॥ तत्र देवास्त्रयः प्रोक्ता लोका वेदास्त्रयोऽग्नयः॥ तिस्रो मात्रार्धमा
त्रा च प्रत्यक्षस्य शिवस्य तत्॥ ऋग्वेदो गार्हपत्यं च पृथिवी ब्रह्म एव च॥ अकारस्य शरीरं तु व्याख्या
तं ब्रह्मवादिभिः॥ यजुर्वेदोन्तरिक्षं च दक्षिणाग्निस्तथैव च॥ विष्णुश्च भगवान्देव उकारः परिकीर्ति
तः॥ सामवेदस्तथा द्यौश्चाहवनीयस्तथैव च॥ ईश्वरः परमो देवो मकारः परिकीर्तितः॥ सूर्यमं
डलमाभाति ह्यकारश्चंद्रमध्यगः॥ उकारश्चंद्रसंकाशस्तस्य मध्ये व्यवस्थितः॥ मकारश्चाग्नि
संकाशो विधूमो विद्युतोपमः॥ तिस्रो मात्रास्तथा ज्ञेया सोमसूर्याग्नितेजसः॥ शिखा च दीपसं
काशा यस्मिन्नुपरि वर्तते॥ अर्धमात्रा तथा ज्ञेया प्रणवस्योपरि स्थिता॥ पद्मसूत्रनिभा सूक्ष्मा
शिखाभा दृश्यते परा॥ नासादि सूर्यसंकाशा सूर्यं हित्वा तथा परं॥ द्विसप्ततिसहस्राणि नाडि
भिस्त्वा तु मूर्धनि॥ वरदं सर्वभूतानां सर्वं व्याप्येव तिष्ठति॥ कांस्यघंटानिनादः स्याद्यदा लिप्यति शां
तये ॐकारस्तु तथा योज्यः श्रुतये सर्वमिच्छति॥ यस्मिन्स लीयते शब्दस्तत्परं ब्रह्म गीयते॥ सोऽमृत
त्वाय कल्पते॥ सोऽमृतत्वाय कल्पत इति॥ हरिः ॐ तत्सत्॥ सह नाववतु इत्यादि शांतिः॥ इति श्री प्रणवोपनि
षत्॥

© Dharmartha Trust. Digitized by eGangotri

श्रीगणेशायनमः॥ आरुणिः प्रजापतिलोकं जगाम तं गत्वोवाच केन भगवन्कर्माण्यशेषतो विसृजामीति॥
सहोवाच प्रजापतिस्तव पुत्रान्भ्रातॄन्बांधवादीन्शिखां च यज्ञोपवीतं च यागं च स्वाध्यायं च भूर्लोकं च
भुवर्लोकं च महर्लोकं जनलोकं तपोलोकं सत्यलोकं चातलपातालवितलसुतलरसातलमहातला
तलं ब्रह्मांडं च विसर्जयेद्दंडमाच्छादनं च कौपीनं च परिग्रहेच्छेषं विसृजेदिति इति प्रथमः
खंडः॥ गृहस्थो ब्रह्मचारी वानप्रस्थो उपवीतं शिखां भूमावप्सु वा विसृजेल्लौकिकाग्नीनुदराग्नौ
समारोपयेद्गायत्रीं च स्ववाचाग्नौ समारोपयेत्कुटीचरो ब्रह्मचारी कुटुंबं विसृजेत्पात्रं विसृजेत्पवित्रं
विसृजेद्दंडांल्लोकांश्च विसृजेदिति होवाचात ऊर्ध्वममंत्रवदाचरेदूर्ध्वगमनं विसृजेत्त्रिसंध्यादौ स्नानमाचरेत्संधिं समा
धावात्मन्याचरेत्सर्वेषु वेदेष्वारण्यकमावर्तयेदुपनिषदमावर्तयेदुपनिषदमावर्तयेदिति इति
द्वितीयखंडः॥ खल्वहं ब्रह्मसूत्रं सूचनात्सूत्रं ब्रह्मसूत्रमहमेव विद्वान्याहिः सूत्रं त्यजे
द्विद्वान्य एवं वेद कामक्रोधहर्षरोषलोभमोहदंभदर्पासूयाममत्वाहीन्यतरं कृत्स्नमग्न्युपवीतं कर्म कलत्रं च स
त्यजेद्यथा सिद्धं वपीतलोष्ठाय यो विद्वान्संन्यसेज्जनाद्दुमेतानि प्रविसृजामितरं कृत्स्नमग्न्युपवीतं कर्मक
लत्रं चान्यद्यदीह संन्यस्तं मया संन्यस्तं मयेति त्रिः कृत्वोर्ध्वं वैणवं दंडं कौपीनं च परिग्रहेद्दान्यद्यथाभिक्षाचर्यं च

© Dharmartha Trust. Digitized by eGangotri

चरतिब्रह्मचर्यमहिंसांचापरिग्रहंचसतचपलेनहेरक्षवाहेरक्षवो॥इतितृतीयखंडः॥अथासःपरमहंसा
नांपरिव्राजकानामासनशयनादिकंभूमौब्रह्मचर्यम् एमयपात्रं अलाबुपात्रंदारुपात्रंवायतिनायत
योहिभिक्षार्थंग्रामप्रविशंसुदरपात्रेपाणिपात्रंपाणिपात्रं ॐ हि ॐ हि ॐ हियेतदुपनिषदंवि
न्यसेतखल्वेतदुपनिषदंविद्वानएवंवेदपालाशंबैल्वंदंडंमजिनंमेखलांजज्ञोपवीतंचत्यक्त्वा
शूरोपएवंवेद॥तद्विष्णोःपरमंपदंसदापश्यंतिसूरयः॥दिवीवचक्षुराततं॥तद्विप्रासोविपन्यवो
जागृवांसस्समिंधते॥विष्णोर्यत्परमंपदमिति निर्वाणमनुशासनमितिवेदानुशासनमिति
॥१॥इत्यथर्ववेदेब्राह्मणोपंचविंशतिः॥२५॥समाप्तिगमः॥अथकालाग्निरुद्रोपनिषद्भगवा
न्सनत्कुमारःपप्रच्छ अधीहिभगवन्त्रिपुंड्रविधिंसतत्वंकिंद्रव्यंकेतिप्रमाणंकारेखाःकिं
देवतंकेमंत्राःकाःशक्तयःकिंफलमितितंहोवाचभगवान्कालाग्निरुद्रःयद्रव्यंतदाग्नेयं
स्त भस्मसद्योजातादिपंचब्रह्ममंत्रैःपरिगृह्याग्निरितिभस्मेत्यभिमंत्र्यमानस्तोकेतिसमु
धृत्यत्र्यंबकंयजामहेतित्रिशिरोललाटवक्षस्कंधेष्विति त्रिभिस्तिस्रोरेखाःप्रकुर्वीतव्रतमे
तच्छांभवंततःसमाचरन्मुमुक्षुर्नपुनर्भवायाथसनत्कुमारः॥प्रमाणमस्यात्रिधाललाटादाचक्षुष
भ्रुवोर्मध्यतोयास्यप्रथमारेखासागार्हपत्यश्चाकारभूर्लोकश्चात्मात्रियास्यकंद्वितीयारेखा
साचदक्षिणाग्निरुकारः॥सत्वमंतरिक्षमंतरात्माचेच्छाशक्तिर्यजुर्वेदोमाध्यंदिनंमाध्यंदिनंसवनं
ऋग्वेदप्रातःसवनमहेश्वरोयास्य

© Dharmartha Trust. Digitized by eGangotri

२ सदाशिवोपास्यतृतीयारेखासाआहवनीयोमकारस्तमोद्यौः॥परमात्माज्ञानक्रियाशक्तिः॥सामवेदस्तृ
2 तीयसवनंशिवोदेवतेतियोविद्वान्ब्रह्मचारीगृहस्थोवानप्रस्थोयतिर्वासमस्तपातकउपपातके
भ्यःपूतोभवतितेनसर्वेवेदाध्याताभवंतिससर्वैर्देवैर्ज्ञातोभवतिससर्वेषुतीर्थेषुस्नातोभवति
देहंत्यक्त्वाशिवसायुज्यतामेतिनचपुनरावर्ततेनचपुनरावर्तते॥इत्याहभगवान्कालाग्निरु
द्रः इत्यथर्वणवेदेकालाग्निरुद्रोपनिषत्समाप्तः॥इतिकालाग्निरुद्रोपनिषत्समाप्तः॥ ॥

© Dharmartha Trust. Digitized by eGangotri